This Question Paper consists 42 questions and 8 printed pages.
अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।

Roll No. अनुक्रमाङ्कः अङ्केषु | | | | | | | | | | | | |

Code No. 54/S/A/S
कूट सं.
Set - A

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of Invigilators 1. ______________________
(निरीक्षकहस्ताक्षरो)
2. ______________________

**सामान्य अनुदेशाः :**

**1** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

**2** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

**3** वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

**4** वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

**5** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

**6** स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **54/S/A/S-A** अवश्यं लेखनीया ।

# SANSKRIT
# संस्कृतम्
# (209)

समयः 3 होरात्रयम्] [पूर्णाङ्काः : 100

निर्देशाः :

**(1)** अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः ।

**(2)** प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

खण्ड – क

1 प्रेरणा इति पाठानुसारम् ________ अनेके लघुगर्ताः आसन् । 1

(A) राजमार्गे (B) शिलाखंडे

(C) कूपसमीपे (D) मुख्यद्वारे

2 'त्याज्यं न धैर्यम्' इति पाठे मकरी मकरं किम् आनेतुम् आदिशति ? 1

(A) वानरम् (B) जम्बुफलम्

(C) आम्रफलम् (D) दाड़िमफलम्

3 रक्तमुखः वानरः ________ वसति स्म । 1

(A) कूपसमीपे (B) स्थले

(C) जम्बुवृक्षे (D) समुद्रसमीपे

4 विपत्तेः निवारणाय ________ चिन्तनीयाः । 1

(A) अपायाः (B) सुहृदः

(C) सशक्ताः (D) उपायाः

5 आर्यभटेन ________ ग्रन्थः विरचितः । 1

(A) सिद्धान्तशिरोमणिः (B) खण्डनखाद्यकरणम्

(C) आर्यभटीयम् (D) ब्रह्मस्फुटसिद्धान्तम्

6 'कर्मणा' इति पदे का विभक्तिः ? 1

(A) प्रथमा (B) पंचमी

(C) षष्ठी (D) तृतीया

7 ‘<u>भवता</u> सत्यमभिहितम्’ इति पंक्त्यां रेखाङ्कितपदे का विभक्तिः ? **1**

(A) तृतीया (B) पंचमी
(C) चतुर्थी (D) सप्तमी

8 ‘चन्द्रः सूर्यम् <u>छादयति</u>’ अत्र ‘छादयति’ इत्यस्मिन् क्रियापदे कः लकारः ? **1**

(A) लङ् (B) लट्
(C) लोट् (D) लृट्

9 ‘मां तं वृक्षं प्रति नय’ इत्यत्र ‘मां’ इत्यस्य मूलशब्दः कः ? **1**

(A) मातृ (B) माम्
(C) अस्मद् (D) युष्मद्

10 रिक्तस्थाने किं पदं भविष्यति ? **1**

विद्या योगेन ________ ।

(A) प्राप्यते (B) दीयते
(C) रक्ष्यते (D) लभ्यते

11 कौ मत्स्यौ सरः त्यक्त्वा निष्क्रान्तौ ? **1+1=2**

12 (i) ‘‘मम भाग्ये विद्या नास्ति’’ – इति कस्य उक्तिः ? **1+1=2**

(ii) कूपस्यसमीपे कीदृशः शिलाखण्डः आसीत् ?

13 आदिकाव्यं किम्, कः च आदिकविः ? **1+1=2**

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1×3=3**

चन्द्रकेतुः लवः च – (अन्योन्यं प्रति)
अहो प्रियदर्शनः कुमारः ।
(स्नेहानुरागं निर्वर्ण्य) कथमिवअयम् आत्मीयः इव प्रतिभाति ?

सुमन्त्रः – प्रायशः प्राणिनाम् एषः स्वभाव एवायतः
कस्यचित् क्वचित् आनन्दमयी प्रीतिः भवति एव ।

अहेतु : – पक्षपाते यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥

कुमारौ – (अन्योन्यमुदिदश्य) यं निरीक्ष्यैव ममांगेषु आलिंगनस्य अभिलाष
उत्पद्यतेतत्कथं मृदुशरीरेऽस्मिन् शराः भोक्तव्याः ।

**प्रश्नाः –**

(i) कुमारः कीदृशः आसीत् ?
(ii) भूतानि अन्तः कः सीव्यति ?
(iii) प्रीतिः इति विशेष्यस्य किं विशेषणपदमत्र प्रयुक्तम् ?

**15** कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत । **1×5=5**

गौतमी **अथवा** कण्वः

**16** प्रश्नान् उत्तरत – **1+1=2**

(i) आहारः कति विधः भवति ?

(ii) अहिंसा कीदृशं तपः अस्ति ?

**17** (i) परिवारे सर्वे सदस्याः केन भावेन वर्तन्ताम् ? **1+1=2**

(ii) भ्राता कं प्रति द्वेषं न कुर्यात् ?

**18** वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च । **1+1=2**

अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

(i) यत्नेन किं संरक्षेत् ?

(ii) कस्मात् क्षीणः अक्षीणः भवति ?

**19** एषा सा दृश्यते सीते राजधानी पितुर्मम । **1+1=2**

अयोध्यां कुरु वैदेहि । प्रणामं पुनरागता ॥

(i) कस्य राजधानी तत्र दृश्यते ?

(ii) राजधान्याः किं नाम आसीत् ?

**20** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – **1×3=3**

स्वस्ति पन्थामनुचरेम सूर्या चन्द्रमसाविव ।

पुनर्ददताऽघ्नता जानता संगमेमहि ॥

(i) वयं कीदृशं पन्थामनुचरेम ?

(ii) कौ सर्वदा सर्वेषां हितं कुरुतः ?

(iii) वयं कैः सह संगतिम् कुर्याम ?

**21** निम्नलिखित पद्यस्य अन्वये रिक्तस्थानपूर्तिं कुरुत – **1×3=3**

जीवनं सर्वप्राणिनां जलाशय सुनिर्भरम् ।

संरक्ष्यं वर्धनीयं च जलं रक्षति रक्षितम् ॥

<u>अन्वयः</u> –

सर्व प्राणिनां ________ (i) जलाशय सुनिर्भरम् ________ (ii) जलं रक्षति, जलं ________ (iii) वर्धनीयम् च ।

**22** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – **1+1=2**

(i) मनः शीघ्रतरं <u>वातात्</u> ।

(ii) <u>दानं</u> मित्रं भरिष्यतः ।

**23** (i) ''तदहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत्कर्त्तव्यम् ।'' **1+1=2**
– अत्र 'अहं' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ii) ''साधु, राजपुत्र ! साधु, सत्यमैक्ष्वाकवः खल्वसि ।'' इति कः कं प्रति कथयति ?

**24** ''ईशः क्व अस्ति'' इति पाठे ईशप्राप्तये कविः किं–किं त्यक्तुं कथयति ? **2**

**25** अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत – **1×3=3**

इति सत्यादिधर्माणाममोघं बलमद्भुतम् ।
वर्णयन् ग्राहयामास व्रतानि सुबहून् गुरुः ॥

(i) सत्यादिधर्माणां बलं कीदृशम् आसीत् ?

(ii) 'गुरुः' इति पदस्य कः अर्थः ?

(iii) गुरुः व्रतानि कान् ग्राहयामास ?

**26** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत – **1×3=3**

प्रभूतमल्पकार्यं वा योनरः कर्तुमिच्छति ।
सर्वारंभेण तत्कुर्यात् सिंहादेकं प्रकीर्तितम् ॥

(i) 'सर्वारंभेण' इत्यस्य कः अर्थः ?

(ii) सर्वारंभेण कीदृशं कार्यं भवितुं शक्यते ?

(iii) सिंहस्य एकः कः गुणः प्रकीर्तितः ?

**27** कस्यचिदेकस्य पाठस्य सारांशं पञ्च वाक्येषु संस्कृतेन लिखत – **1×5=5**

(i) यद्भविष्यो विनश्यति ।

(ii) करुणापराः हि साधवः ।

(iii) प्राणस्य श्रेष्ठत्वम् ।

## खण्ड – ख
## अनुप्रयुक्त व्याकरणम्

**28** अधोलिखितेषु कण्ठ्यवर्णौ चित्वा लिखत – **1+1=2**

क र ह ड ट द

**29** रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा संधिनाम लिखत – **1×3=3**

(i) नरो वार्यधिगच्छति ।

(ii) सर्वारम्भेण तत्कुर्यात् सिंहादेकं प्रकीर्तितम् ।

**30** सन्धिं कुरुत – **1+1=2**

तत् + नूने प्रभातसमये मत्स्यजीविनः + अत्र समागत्य मत्स्यसंक्षयं करिष्यन्ति ।

**31** राजलक्ष्मीः शशिनः प्रभेव अधिकम् अराजत । **1+1=2**

इति रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ?

**32** रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत – **1×3=3**

(i) ___(2)___ नेत्रे

(ii) ___(4)___ विद्वांसः

(iii) ___(5)___ इन्द्रियाणि

**33** रेखाङ्कितपदयोः कः धातुः कश्चलकारः ? **1+1=2**

(i) त्यजजपमालां ।

(ii) सलीलमीशः सृजति भुवम् ।

**34** रेखाङ्कितपदयोः कः मूलशब्दः काच विभक्तिः ? **1+1=2**

कः शत्रुर्दुर्जयः पुंसाम् ।

**35** अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – **1+1=2**

(i) सुकलत्रः

(ii) बोधिद्रुमतले

**36** अधोलिखित विग्रहाणां कृते समस्तपदं लिखत – **1+1=2**

(i) अनुजेन सह

(ii) रथम् आरूढः

**37** रिक्तस्थाने किं पदं भविष्यति ? **1+1=2**

(i) सर्वैः सह _________ चलितव्यम् । (मिल् + क्त्वा)

(ii) प्रभूणाम् आज्ञाम् _________ निजपरिचयमददत् एवायाति । (उत् + लंघ् + क्त्वा (ल्यप्)

**38** रिक्तस्थानपूर्तिं कुरुत – **1×3=3**

(i) सिंहात् _________ प्रकीर्तितम् । (एक)

(ii) सर्वतः सारमादघात् _________ इव षट्पदः । (पुष्प)

(iii) सर्वप्रथमं का _________ बहिः गता । (शरीर)

**खण्ड – ग**

**रचनाकौशलम्**

**39** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् उत्तरत – **1×5=5**

प्रयागे गङ्गायमुनयोः सङ्गमः भवति । तत्र द्वयोः नद्योः संगमतटे माघमासे मेलापकः आयोज्यते । द्वादशवर्षेषु एकबारं महाकुम्भो भवति । महाकुम्भे देशिकाः वैदेशिकाः, संन्यासिनः, यतिनः, सन्तजनाः, वेदज्ञाः, विद्वांसः, सर्वेषां धर्माणां प्रचारकाः सम्मिलन्ति सर्वे संगमे स्नानंकृत्वा आत्मानं धन्यम् मन्यन्ते । गङ्गायाः विस्तृतंवर्णनं कालिदासेन रघुवंशकाव्ये सम्यग् विहितम् ।

**प्रश्नाः –**

(i) प्रयागे कयोः नद्योः सङ्गमः भवति ?

(ii) संगमतटे मेलापकः कदा आयोज्यते ?

(iii) द्वादशवर्षेषु एकबारं प्रयागे किं भवति ?

(iv) 'वर्णनम्' इतिपदस्य विशेषणं किम् ?

(v) 'देशिकाः' इति पदस्य किं विलोम पदमत्र प्रयुक्तम् ?

**40** अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत । **1×5=5**

''स्वच्छता – अभियानम्''

**मञ्जूषा**

| |
|---|
| स्वास्थ्याय, आवश्यकं, भवेत्, स्वच्छता, वातावरणं शरीरस्य, परिसरस्य, अभियानं, सर्वे, मिलिता, स्वस्थंमनः, आत्मा, सुखमयं, आनंददायकं रोगनिवारकम् । |

**41** भवान् सुरेशः । भवतां मित्रं दिनेशः धावन प्रतियोगि तायां प्रथमपुरस्कारं प्राप्तवान् । तं प्रति शुभकामनापत्रं मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु । **1×5=5**

लखनऊनगरम्

तिथिः....

प्रिय मित्र दिनेश,

नमस्ते ।

भवान् धावने प्रथमं (i) _______ प्राप्तवान् इतिज्ञात्वा अतीव (ii) _______ जाता । त्वं तु सत्यमेव (iii) _______ इति मन्ये । सूचयतु (iv) _______ भवान् गृहम् आगमिष्यति । सर्वे भवन्तं स्मरन्ति (v) _______ च ।


भवतः सुहृत्

सुरेशः

**मञ्जूषा**

| प्रतिभाशाली, पुरस्कारं, प्रसन्नता, अभिनन्दन्ति, कदा |
|---|

**42** अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **1×5=5**



**मञ्जूषा**

| छात्राः, पुस्तकानि, श्यामपटे, शिक्षकः तान्, संस्कृतं, पृच्छति, उत्थाय, प्रश्नस्य ददाति, उत्तरं, वाचयति, क्रमशः, श्लोकं श्रावयति, उत्तरपुस्तिकायां, लिखन्ति । |
|---|